# <u>નવગ્રહ સ્તોત્રં</u>

જપા કુસુમ સંકાશં કાશ્યપેયં મહાદ્યુતિમ ।
તમોરિં સર્વ પાપઘ્નં પ્રણતોઽસ્મિ દિવાકરમ ॥ ૧ ॥

દધિશંખ તુષારાભં ક્ષીરાર્ણવ સમુદ્ભવમ ।
નમામિ શશિનં સોમં શંભોર્મુકુટભૂષણમ ॥ ૨ ॥

ધરણીગર્ભ સંભૂતં વિદ્યુત કાંતિ સમપ્રભમ ।
કુમારં શક્તિહસ્તંતં મંગળં પ્રણમામ્યહમ ॥ ૩ ॥

પ્રિયંગુકાલિકાશ્યામં રૂપેણાપ્રતિમાંબુધમ ।
સૌમ્યંસત્વગુણોપેતં તં બુધં પ્રણમામ્યહમ ॥ ૪ ॥

દેવાનાંચ ઋષિણાંચ ગુરું કાંચન સન્નિભમ ।
બુદ્ધિમંતં ત્રિલોકેશં તં નમામિ બૃહસ્પતિમ ॥ ૫ ॥

હિમકુંદમૃણાલાભં દૈત્યાનાં પરમં ગુરુમ ।
સર્વ શાસ્ત્ર પ્રવક્તારં ભાર્ગવં પ્રણમામ્યહમ ॥ ૬ ॥

નીલાંજન સમાભાસં રવિપુત્રં યમાગ્રજમ ।
છાયામાર્તાંડ સંભૂતં તં નમામિ શનૈશ્ચરમ ॥ ૭ ॥

અર્ધકાયં મહાવીર્યં ચંદ્રાદિત્ય વિમર્દનમ ।
સિંહિકાગર્ભ સંભૂતં તં રાહું પ્રણમામ્યહમ ॥ ૮ ॥

પલાષપુષ્પ સંકાશં તારકાગ્રહ મસ્તકમ ।
રૌદ્રં રૌદ્રાત્મકં ઘોરં તં કેતું પ્રણમામ્યહમ ॥ ૯ ॥

ઈતિ વ્યાસં મુખોદ્ગીતં ચઃ પઠેસ્તુ સમાહિતૌ ।
દિવાવાચ દિવારાત્રૌ વિધ્નઃ શાંતિર્ભવિષ્યતિ ॥ ૧૦ ॥

નર નારી નૃપાણાંચ ભવે દુઃસ્વપ્ન નાશનમ ।
ઐશ્વર્યમતુલાં તેષાં આરોગ્યં પુષ્ટિવર્ધનમ ॥ ૧૧ ॥

ગ્રહ નક્ષત્ર જાઃપીડા સ્તસ્કરાગ્નિ સમુદ્ભવામ ।
તાઃ સર્વાઃ પ્રશમં ચાન્તિ વ્યાસો બ્રૂતે ન સંશયઃ ॥ ૧૨ ॥

ૐ ઈતિ શ્રી નવગ્રહ સ્તોત્રં સંપૂર્ણમ